श्री शिव स्तोत्रं (असित कृतं)

श्री शिव स्तोत्रं (असित कृतं)

असित उवाच –
जगद्गुरो नमस्तुभ्यं शिवाय शिवदाय च |
योगींद्राणां च योगींद्र गुरूणां गुरवे नमः || 1 ||

मृत्योर्मृत्युस्वरूपेण मृत्युसंसारखंडन |
मृत्योरीश मृत्युबीज मृत्युंजय नमोऽस्तु ते || 2 ||

कालरूपः कलयतां कालकालेश कारण |
कालादतीत कालस्थ कालकाल नमोऽस्तु ते || 3 ||

गुणातीत गुणाधार गुणबीज गुणात्मक |
गुणीश गुणिनां बीज गुणिनां गुरवे नमः || 4 ||

ब्रह्मस्वरूप ब्रह्मज्ञ ब्रह्मभावनतत्परः |
ब्रह्मबीजस्वरूपेण ब्रह्मबीज नमोऽस्तु ते || 5 ||

इति स्तुत्वा शिवं नत्वा पुरस्तस्थौ मुनीश्वरः |
दीनवत्साऽश्रुनेत्रश्च पुलकांचितविग्रहः || 6 ||

असितेन कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् |
वर्षमेकं हविष्याशी शंकरस्य महात्मनः || 7 ||

स लभेद्वैष्णवं पुत्रं ज्ञानिनं चिरजीविनं |
भवेद्धनाढ्योऽदुःखी च मूको भवति पंडितः || 8 ||

अभार्यो लभते भार्यां सुशीलां च पतिव्रतां |
इह लोके सुखं भुक्त्वा यात्यंते शिवसन्निधिं || 9 ||

इदं स्तोत्रं पुरा दत्तं ब्रह्मणा च प्रचेतसे |
प्रचेतसा स्वपुत्रायासिताय दत्तमुत्तमं || 10 ||

इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे असितकृत शिवस्तोत्रं |